# संस्कृत वार्ताः

**दिनाङ्क : 06/09/2026 सायम् - 06:20**

**<u>आदौ मुख्यवार्ताः</u>**

- ऊनत्रिंशदधिक द्वि सहस्र तम वर्षं यावत् भारतं मादक-द्रव्य-मुक्तं विधातुम् एका त्रि-वार्षिकी मार्गदर्शिका प्रस्तुता, आगामि-त्रि-वर्षेषु शत अन्ताराष्ट्रिय-तथा अन्ताराज्यीय-मादक-सञ्जालानि खण्डयितुं केन्द्रीय-गृह-मन्त्रिणा अमित-शाहेन निर्धारितं लक्ष्यम्।
- भारतस्य आर्थिक-शक्तिः नीति-गतिशीलता च देशं 'विकसित-भारतस्य' लक्ष्यं प्रति नयतः, भारतीय-प्रतिष्ठानानि जागतिक-स्तरे नेतृत्वं कुर्युः इति प्रधानमन्त्रिणः नरेन्द्र-मोदिनः ओजस्वयुतम् आह्वानम्।
- संयुक्त-राष्ट्र-संसदि 'समान-क्षेत्रफल-मानचित्र-प्रस्तावस्य' भारतेन कृतं समर्थनम्, संप्रभुता-प्रादेशिक-अखण्डतयोः अक्षुण्णताम् रेखाङ्कयन् भारतेन प्रोक्तं यत् जम्मू-कश्मीर-लद्दाख-समेत्य-समस्त-क्षेत्रस्य प्रदर्शनं केवलम् आधिकारिक-मानचित्रानुसारम् एव स्वीकार्यम्।
- मध्य प्रदेशस्य सागर-मण्डले संदिग्ध-विषाक्त-मद्य-पानेन दश जनाः मृत्युमुपगताः, पंचत्रिंशत् जनाः चिकित्सालयेषु प्रवेशिताः, कतिपय संदिग्धाः आरक्षिदलेन गृहीताः।

**अपि च,**

- चीन-देशस्य शेन्झेन्-नगरे आयोजितायां बैडमिण्टन्-प्रतिस्पर्धायाम् 'चाइना-मास्टर्स्' पुरुष-युगल-प्रतियोगितायाः चषकं भारतस्य सात्विकसाईराज-रङ्कीरेड्डी-चिराग-शेट्टी-युगलेन विजितम्।

## शाह-गोवा दौरा

केन्द्रीय-गृह-मन्त्री अमित-शाहः अद्य गोआ-राज्ये वार्ताहरसम्मेलने ऊनत्रिंशदधिकद्विसहस्रतम वर्षं यावत् भारतं मादक-द्रव्य-मुक्तं कर्तुं रूपरेखां प्राकटयत्। तेन मादक-पदार्थ-विरोधि-त्रि-वार्षिक-राष्ट्रिय-अभियानस्य आह्वानं कृतम्। गृह-मन्त्रिणा संसूचितं यत् प्रशासनेन शत मादक-सञ्जालानि खण्डयितुम्, शत अपराधिनः भारतम् आनेतुम्, तथा शत अवैधिक-प्रयोगशालाः विनष्टं कर्तुम् उच्च-लक्ष्यं निर्धारितम्।

## पीएम-एसआरसीसी संबोधन

नवदेहल्यां 'श्रीराम-कॉलेज-ऑफ-कॉमर्स' महाविद्यालयस्य शत वर्षे सम्पूर्णे सति आयोजिते शताब्दी-समारोहे प्रधानमन्त्री मोदी मुख्य-अभ्यागतः आसीत्। तेन 'जेन-जी' युवा-उद्यमिनः प्रोत्साहयितुम् 'उच्च-लक्ष्य-धारणस्य' मन्त्रो दत्तः। तेन प्रोदीरितं यत् भारतीय-मेधा जागतिक-व्यापार-जगत् नूतनां दिशं दर्शयति, ए.आई.-प्रौद्योगिक्याः उपयोगेन च देशः आर्थिक-समृद्धिं प्राप्नोति।

आर्थिक-दृढतां प्रतिपादयन् प्रधानमन्त्री अवदत् यत् पश्चिम-एशिया-सङ्कटावधौ अपि भारतेन सप्त दशांश अष्ट प्रतिशतम् यावत् अभूतपूर्व-संवृद्धि-मानमर्जितम्। अनेन भारतस्य आन्तरिक-शक्तेः परिचयः लभ्यते। तेन प्रख्यापितं यत् वैश्विक-सङ्कटेषु भारतस्य दृढ-नीति-सञ्चालनम् अद्य जागतिक-स्तरे श्लाघनीयं वर्तते।

आत्मनिर्भर-भारतस्य दिशि 'मेक्-इन्-इण्डिया' अभियानम् अभूतपूर्वं परिवर्तनं साधयति इति प्रधानमन्त्री अवदत्। अनेन अभियानेन भारतम् अद्य प्रमुख-निर्यातक-राष्ट्रमभवत्। असौ न्यगादीत् यत् स्मार्टफोन्-क्षेत्रे सार्धद्विलक्ष कोटि रूप्यकाणाम् निर्यातं सम्प्राप्तम्, रक्षा-उत्पादने च द्विलक्ष कोटि - रूप्यकाणाम् नूतन-कीर्तिमानम् स्थापितम्। रक्षा-निर्यातं च षट्-शत-कोटिभ्यः वर्धित्वा चत्वारिंशत् सहस्र-कोटि-रूप्यकाणि अभवत् ।

## विदेश मंत्रालय

भारतस्य भौगोलिक-अखण्डतां संप्रभुताञ्च रेखाङ्कयन् विदेश-मन्त्रालयः संयुक्त-राष्ट्रस्य मानचित्र-प्रस्तावे स्व-पक्षम् उपस्थापितवान्। मन्त्रालयस्य प्रवेक्त्रा रणधीर-जैसवालेन प्रोक्तं यत् भारतेन यु.एन.-प्रस्तावस्य समर्थनं कुर्वता स्पष्टं कृतं यत् भारतस्य राष्ट्रिय-सीमासु किमपि भ्रामकं प्रदर्शनं असह्यम् अस्ति। तेन प्रोक्तं यत् अयं प्रस्तावः कस्यापि देशस्य सीमायाः अनुमोदनं न करोति, अपि तु केवलं समान-क्षेत्रफल-प्रदर्शनस्य नीतिं पोषयति।

## दिल्ली-दुर्घटना

नवदेहल्याम् अद्य महती दुर्घटना अभवत्, यत्र सत्यनिकेतन-क्षेत्रे एकं पञ्च-स्तरीयं भवनं ध्वस्तम् अभवत्। सूचनां प्राप्य देहली-अग्निशमन-दलेन अष्टादश-वाहनानि प्रेष्य आपद् उद्धार-कार्यम् आरब्धम्। ततः एव चतुःजनाः उद्धृत्य चिकित्सालयम् प्रति नीताः, तेषु एकः मृत्युमुपगतः अन्ये च गभीरावस्थायां सन्ति। उपराज्यपालः तरञ्जीत-सिंह-सन्धुः मुख्यमन्त्री रेखा गुप्ता च पीडितानां साहाय्याय त्वरित-निर्देशान् अयच्छताम्। सहैव सुरक्षा-दृष्ट्या पार्श्वस्थम् एकम् अपरं भवनमपि रिक्तं कारितम्।

## मध्य प्रदेश-मादक पदार्थ

सागर-मण्डले विषाक्त-मद्य-पानेन भीषण-त्रासदी संजाता, यत्र दश जनाः स्वप्राणान् अयच्छन्। पंचत्रिंशत् जनाः चिकित्सालयेषु नीताः, येषु केषाञ्चन अवस्था गभीरा वर्तते।

गम्भीर-रुग्णाः बुन्देलखण्ड-वैद्यकीय-महाविद्यालयं तथा सागर-मण्डल-चिकित्सालयं प्रति स्थानान्तरिताः सन्ति। एषा घटना बण्डा-आरक्षि-स्थानक-क्षेत्रस्य 'नौराजा' तथा 'घुघरा खुर्द' इति ग्रामयोः संजाता। समाहर्त्री अवदत् यत् शव-परीक्षणस्य प्राथमिक-निष्कर्षैः मिथैल्-ऐल्कोहॉल् इति विषाक्त-रसायनस्य सेवनस्य सम्भावना प्रतीयते। घटना-सम्बन्धे बण्डा-थाना-क्षेत्रात् केचन संदिग्धाः गृहीताः सन्ति।

**दिल्ली – ब्रिक्स**

ब्रिक्स्-शिखर-सम्मेलनस्य आतिथ्यं कर्तुं राष्ट्र-राजधानी नवदेहली पूर्ण-सज्जतां भजते। सितम्बर-मासस्य द्वादश त्रयोदश दिनाङ्कयोः 'भारत-मण्डपम्' इत्यत्र आयोज्यमानस्य अस्य बृहत्-सम्मेलनस्य सुरक्षा-समीक्षायै देहली-आरक्षि-दलेन अद्य वाहन-व्यूह-पूर्वाभ्यासः सञ्चालितः। सम्मेलने विश्व-नेतारः ब्रिक्स्-देशानां प्रमुखाश्च भागं ग्रहीष्यन्ति।

**उपराष्ट्रपति गोल्डन जुब्ली**

आसाम-प्रवासे सम्प्राप्तः उपराष्ट्रपतिः सी. पी. राधाकृष्णन् अद्य गुवाहाट्यां गीतानगर-महाविद्यालयस्य पंचाशत्-तमे वार्षिकोत्सवे मुख्य-अभ्यागतः आसीत्। तेन छात्रान् सम्बोध्य गुणवत्तापूर्वकं शिक्षायै अनुसन्धानाय च बलम् दत्तम्। उपराष्ट्रपतिना उच्च-शिक्षायां महिलानां सहभागिता 'नारी-शक्तेः' प्रतीकमिति अभिहितम्।

**बैडमिण्टन्-क्रीडायाम्**

बैडमिण्टन्-क्रीडायाम्, अद्य शेन्ज़ेन-नगरे चाईना-मास्टर्स्-स्पर्धायाः पुरुषयुगलक्रीडायां सात्विकसाईराज् रङ्किरेड्डी तथा चिराग् शेट्टी इत्येतयोः भारतीययुगलेन उपाधिः विजितः। चीन-देशस्य ही-जी-टिङ्ग् तथा रेन्-जियाङ्ग्-यू इत्युभयोः युगलं एकादश-एकविंशति, एकविंशति-त्रयोदश, एकविंशति-सप्तदश अङ्कैः पराजित्य प्रथमवारं स्वर्णपदकं प्राप्तवन्तौ।

**।। इति वार्ताः ।।**